# चतुर्दशः पाठः

## रक्षाबन्धनम्



रक्षाबन्धनं पर्व श्रावणमासस्य पूर्णिमायां तिथौ भवति। अस्यां तिथौ भगिन्यः स्वानुजानां अग्रजानाञ्च दक्षिणहस्तेषु रक्षासूत्राणि बध्नन्ति। भगिन्यः भ्रातारं छात्राः छात्रं देशस्य नागरिकाः सैनिकान् रक्षासूत्रं निबद्ध्य परस्परं रक्षितुं संकल्पवन्तः भवन्ति।अस्मिन् दिने या कापि कन्या यस्य कस्यापि पुरुषस्य हस्ते रक्षासूत्रं बध्नातिए सः पुरुषः तां प्रति भ्रातृवत् व्यवहारं करोति।

भारतस्य मध्यकालिके इतिहासे रक्षाबन्धनस्य महत्त्वविषये एकः दृष्टान्तः मिलति। चित्तौडनगरस्य हिन्दूराज्ञी कर्मवती हुमायँूनामकं मुसलमानशासकं स्वभ्रातरं मत्वा तस्य पाश्र्वे रक्षासूत्रं प्रेषितवती। सः सम्राट् रक्षासूत्रं स्वीकृत्य तस्याः सम्मानरक्षाम् अकरोत्। गुजरातनरेशेन सह युद्धे चित्तौडनगरस्य सहायताम् अकरोत्। रक्षाबन्धनदिवसे एव उपाकर्मसंस्कारस्यापि विधानमस्ति। एतदर्थं धार्मिकाः जनाः पुरोहितेन सह नदीतटं पवित्रं सरोवरं वा गच्छन्ति। तत्र आवर्षं कृतानि निषिद्धकार्याणि अनुस्मरन्तिए पुनश्च तानि असत्कार्याणि न भवेयुः इति प्रायश्चित्तं कुर्वन्तिए ओषधीनाम् अनुलेपनं कृत्वा जले बहुवारं स्नानं च कुर्वन्ति। अस्य महत्त्वं ज्ञात्वा भारतशासनेन अयं दिवसः ष्संस्कृतदिवसष् .रूपेणोद्घोषितः अस्ति। यतः संस्कृतं सम्पूर्णं देशं एकतायाः सूत्रे बध्नाति।पूर्णिमायां तिथौत्रपूर्णिमा तिथि को। स्वानुजानाम्त्रअपने छोटे भाइयों के। अग्रजःत्रपहले जन्मे हुए।

बध्नन्तित्रबाँधते हैं। या कापित्रजो कोई। यस्य कस्यापित्रजिस किसी के। भ्रातृभावस्यत्रभाई सरीखे भाव का। आवर्षम्त्रवर्ष भर ;पूरे सालद्ध। निषिद्धकार्याणित्रन किये जाने वाले कर्मों को ;निषिद्धत्रजिनको नहीं किया जाना चाहिएद्ध। अनुस्मरन्तित्रयाद करते हैं। प्रायश्चित्तम्त्रकिये गये निषिद्ध कर्मों का परिशोधन। अनुलेपनम्त्रबाद में लेपन करना। असत्कार्याणित्रअनुचित कार्य। खलुत्रनिश्चय ही । संस्कृतदिवसरूपेणोद्घोषितःत्र संस्कृत.दिवस के रूप में घोषित।

अभ्यासः

**उच्चारणं कुरुत पुस्तिकायां च लिखत.**

श्रावणमासस्य ,पूर्णिमायाम्,उपाकर्मसंस्कारस्यापि,निषिद्धकार्याणि ,अनुस्मरन्ति ,उद्घोषितः

**एकपदेन उत्तरत.**

क-रक्षाबन्धनं पर्व श्रावणमासस्य कस्यां तिथौ भवतिघ्

ख-श्रावणीपर्वणि हिन्दुजनाः केषां पूजनं कुर्वन्तिघ्

ग-भगिन्यः स्वानुजानाम् अग्रजानाञ्च दक्षिणहस्तेषु कानि बध्नन्तिघ्

घ-हिन्दूराज्ञी कर्मवती कस्य पाश्र्वे रक्षासूत्रं प्रेषितवतीघ्

**पूर्णवाक्येन उत्तरत.**

क हुमायूँ.सम्राट् रक्षासूत्रं स्वीकृत्य किम् अकरोत्घ्

ख रक्षाबन्धन.दिवसे एव कस्य संस्कारस्य विधानमस्तिघ्

ग भारतशासनेन अयं दिवसः केन रूपेणोद्घोषितःघ्

घ रक्षाबन्धनदिवसे कस्याः भाषायाः दिवसो भवतिघ्

**अधोलिखित-क्रियापदानाम्, धातुम्, लकारम्, पुरुषम्, वचनं च लिखत-**

क्रियापदम् धातुः लकारः पुरुषः वचनम् यथा- कुर्वन्ति कृ लट् प्रथम पु0 बहुवचनम्

अकरोत् ......... ............ ............... ....................

गच्छन्ति ......... ............ ............... ....................

भवेयुः ......... ............ ............... ....................

**अधोलिखितपदानां विभक्तिं वचनं च लिखत-**

पदम् विभक्तिः वचनम्

यथा- भारतस्य षष्ठी एकवचनम्

इतिहासे ................. .........................

पुरोहितेन ................. .........................

बालिका ................. .........................

ओषधीनाम् ................. .........................

**प्रतीकात्मकचिह्नानाम् आधारे पर्वणां नामानि तत्सम्बद्धे वाक्ये लिखत-**



................

 .

.............

**स्मरणीयम्**

त्रिवादनम्

पंचाधिकत्रिवादनम्

सपादचतुर्वादनम्

दशाधिकत्रिवादनम्

सार्धचतुर्वादनम्

पादोनपंचवादनम्

चत्वारिंशद्-अधिकत्रिवादनम्

पंचन्यूनत्रिवादनम्

**शिक्षण-सङ्केतः**

बालकैः अस्य पाठस्य सारांशं लघुसमूहेषु लेखयत रक्षाबन्धनेन सम्बन्धितकवितानांसंकलनं च कारयत।

**एतदपि जानीत-**

’उत्तरप्रदेशसंस्कृतसंस्थानम्’ लखनऊनगरे अस्ति।

किं किं न साधयति कल्पलतेव विद्या